प्रवेश सं० 29919

विषयः कर्मकाण्ड

क्रम सं० ८०

ग्रन्थकार

नाम रुद्रवर्ति व्रतोद्यापनम्

पत्र सं० १-२

अक्षर सं० (पंक्तौ) 38

पंक्ति सं० (पृष्ठे) 12

श्लोक सं०

लिपिः दे. ना.

आधारः का.

आकारः ८.२.×३.८.

008421

वि० विवरणम् पू.

१.३ $\frac{७३}{२८०}$

पी० एस० यू० पी०—७७ एस० सी० ई०—१६५१—५०,०००

Indira Gandhi National Centre for the Arts

अथरुद्रवर्त्तिव्रतंप्रारभ्यते ॥ द्रौपद्युवाच ॥ लक्षवर्त्तिव्रतंब्रूहि दुर्वासः सर्वदर्शन ॥ क
स्मिन्कालेसमारंभः कस्मिन्नेवसमापनं ॥१॥ दुर्वासोवाच ॥ राजपुत्रीप्रवक्ष्यामिवि
धानंसर्वकामदं ॥ अज्ञाचित्तंयदास्यात्तंतदैवारभ्यपेद्व्रतं ॥ कार्पासस्यस्वहस्तेनतंतु
निष्काश्ययत्नतः ॥ एकादशगुणांकुर्यादशक्तोत्रिगुणात्मकं ॥ ततःस्ववर्त्तयेद्दीर्घांस्वयं
प्रादेशसंमितां ॥ एवंलक्षमिताकार्याशक्तौकोटिमिताअपि ॥ सर्वशक्तौतुकार्पासब
लेनैवविनिर्मिताः ॥ घृतेनैवमज्यतेलेवारश्चापयेत्ताम्रपात्रके ॥ महाशरावेप्यथवा
प्रत्यहंसंख्ययान्वितः ॥ शिवंवाविष्णुमुद्दिश्यदेवागारेविशेषतः ॥ गंगातीरेथवागो
ष्ठेयद्वाब्राह्मणसन्निधौ ॥ प्रज्वालयेत्तुप्रजांतब्रह्मलोकेजीगीमा ॥ नारीवापुरुषो
वाथभक्तियुक्तेनचेतसा ॥ एकस्मिन्नेवदिवसेप्रज्वाल्ययदिसंभ्रतिः ॥ नमःशां
भवद्दयेवंमंत्रोरुद्राक्षरैर्मितः । रुद्रनेवृत्तिदानेचतथातर्पणहोमयोः ॥ अथवामंत्र
न[illegible]सोमंत्रःपौराणिमांततः ॥ एकादशीविशेषणवैष्णवेथमंत्रस्याद्द्वादशाक्षरः ॥ एवसंपा
यवैशाख्यांकार्त्तिक्यांवाविशेषतः ॥ माघ्यांवाप्यथवायस्यांकस्यांचित्पौर्णिमांतिथौ ॥

Indira Gandhi National Centre for the Arts

ातस्नात्वा शुचिर्भूत्वा कुर्यादुद्यापनं व्रती॥ गणेशपूजनं कृत्वा स्वस्तिवाचनकार
येत्॥ आचार्यं वरयेत् पश्चात् सर्वलक्षणसंयुतं॥ देवागारे यथा गोष्ठे शुचौ वा स्थिरमं
दिरे॥ पुष्पमंडपिकां कृत्वा पट्टकूलादिवेष्टितां॥ तन्मध्ये सर्वतोभद्रमुल्लिखेल्लक्ष
णान्वितं॥ मेरुदिक्षु कोणेषु रेखाभिर्बहुरेखिकावृतं॥ वस्त्रेणाच्छादयेत् देवं स्वर्णे
त्रमंडलैः॥ अष्टपत्रान्वितं पद्मं कर्णिकाभिः समन्वितं॥ पंचवर्णरजोभिर्वा सुवर्णे
परिनिर्मितं॥ उमामहेश्वरीमूर्ती शैवे कृत्वा भक्तिभावेन॥ लक्ष्मीनारायणस्यैवं कृत्वा संशाध्य
व्रतः॥ स्थापयेत् प्रथमं चैव ब्रह्माद्यावाहनं ततः॥ ततः पूजाविधानं च महासंभार
विस्तरैः॥ परमान्नेन नैवेद्यं नृत्यादैर्वा परापयेत्॥ उपोष्य जागरं कुर्यात् रात्रौ सत्क
थया मुदा॥ ततः प्रभाते विमले जले स्नात्वा तपस्विनः॥ व्रतसंख्या दशांशेन तर्पणं
कारयेद्व्रती॥ तर्पणस्य दशांशेन होमयेत् पूर्वमंत्रतः॥ प्रशस्ता होमसमिधः
कुशादिवर्जिताः॥ ब्राह्मणान् द्विजश्रेष्ठ कुर्यात्तर्पणमंजसा॥ सतिलैर्यवैः
कुर्याद्गव्येन यज्ञं च द्विजः॥ होमं संपाद्य स्विष्टं वै प्रायश्चित्तं विधाय च॥ आचार्यं पू ॥१॥
जयेद्भक्त्या वस्त्रालंकरणादिभिः॥ आचार्याय प्रदातव्या गौः सवत्सा पयस्वि
नी॥ ब्रह्मादिमंडलं सर्वं दद्यात्सोपस्करं तथा॥ यजमानं अथाचार्यः अभि
षिंचेन्मुदान्वितं॥ विसर्जयेत्ततो देवं ब्रह्मादिसहितं पुनः॥ पूजायित्वा विधानेन
सर्वकामार्थसिद्धिदं॥ दद्याद्दानं यथाशक्ति कर्मसमाप्य च विधानतः॥ होमस्य तु दशां
शेन मार्जनं च ततः परं॥ मार्जनस्य दशांशेन ब्राह्मणान् भोजयेत्ततः॥ दत्वा च दक्षि
णां तेभ्यो गृहीयादाशिषः शुभाः॥ प्रणिपत्य ततो विप्रान् कुर्यात् कर्मसमापनं॥ त
वर्धमानं रौप्यमयं हेमवर्तिसमन्वितं॥ अथवा कांस्यपात्रं च घृतेन परिपूरितं॥
ब्राह्मणाय प्रदातव्यं दक्षिणासहितं शुभं॥ एवं द्रुपदराजेन्द्र पुत्रि सत्यव्रतेन च॥
लक्षवर्तिव्रतविधिः स्तवाग्रे कथितं मया॥ यं कृत्वा भक्तिभावेन नारी वा पुरुषो
ऽपि वा॥ दरिद्रतमसः सद्यो मुच्यते नात्र संशयः॥ पुत्रपौत्रादिजनितं सुखं सं
प्राप्य भूतले॥ अंते दिव्यविमानेन लभते ज्वलितं पदं॥ निषादाधिपते

पितृदर्शनलालसा॥ कृत्वा व्रतमिदं प्राप्य राज्यं नत्सुतान्वितं॥ अन्यापि ऋ
षिपत्नी निऋषिभिः स्थापितेवने॥ कृतमेतद्व्रतं देवि सर्वस्वकामार्थसिद्धये॥ रा
न पुत्रि महाभागे वनव्यसनकर्षिते॥ कुरुष्वेतद्व्रतं सम्यक् माकृथाकालवं
चनं॥ अयं कार्त्तिकमासे यः मासो हरिहरप्रिये॥ दशमी यत्र उपतिथि राज्वरस्व
व्रतोत्तमं॥ आगामिन्यां पौर्णमास्यां उद्यापनविधिं चर॥ इत्थं माकर्ण्य तां कृष्ण
पतिमापच्छसत्वरं॥ सो द्यापनव्रतं चक्रे शैवं वैष्णवमेव च॥ ततो वहरिमाराध्य
सर्वान्प्राप्य मनोरथान्॥ इति द्वं समाख्यातं द्रौपद्या व्रतमुत्तमं॥ ये करिष्यंति
मनुजाः ते लभंते स्वमीरितं॥ वांछितार्थं प्रयच्छंतु नात्र कार्या विचारणा॥
॥छ॥ इति श्रीजैमिनिआरण्यके रूक्मलक्षवर्त्ति व्रतोद्यापनं समाप्तं॥छ॥ ॥१२॥
इदं पुस्तकं विटली उपनाम बस्य॥